MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# The Impact of Other Commentarial Traditions on *Bālamanoramā*: A Study on the *Laṭ* Formation of Root *Bhū*

## भूधातोः लड्विषयकव्याख्यानपरबालमनोरमायां व्याख्यानान्तरप्रभावः

***Subhojit Fouzdar***
*Research Scholar, Dept. of Sanskrit, Patna University, Bihar, India.*
*Email: subhojit.fouzdar.vvv@gmail.com*
***Supervisor**: Dr. C. S. R. Linga Reddy*
*Assistant Professor, Dept. of Sanskrit, B. N. College, Patna, Bihar, India.*
*Page No: 105-114*

***Abstract:*** *This study examines the influence of diverse commentarial traditions on Vāsudeva Dīkṣita's Bālamanoramā, focusing on the exposition of the root Bhū (भू) in Laṭ-lakāra (present tense) within the Tiṅanta-prakaraṇa of the Vaiyākaraṇa-siddhāntakaumudī. Although nominally intended as an introductory commentary for novices, Bālamanoramā synthesizes mature doctrinal insights and scholastic rigor.*

*By analyzing the procedural sutras governing Laṭ formation, this paper reveals the pervasive impact of classical treatises, including Patañjali's Mahābhāṣya, Bhartṛhari's Vākyapadīya, the Kāśikāvṛtti, Bhaṭṭoji Dīkṣita's Prauḍhamanoramā, and Jñānendra Sarasvatī's Tattvabodhinī. Vāsudeva Dīkṣita systematically adapts dialectical deliberations on topics such as continuous present action (arambhānapavarga), secondary intransitivity (avivakṣita-karman), elision, and pronominal concord. Rather than merely simplifying foundational aphorisms, Bālamanoramā absorbs intricate philosophical arguments and seamlessly reframes authoritative traditions into an accessible, lucid framework, establishing its distinct hermeneutical significance in Paninian grammar.*

***Keywords:*** *Bālamanoramā, Bhū-dhātu, Laṭ-lakāra, Vaiyākaraṇa-siddhāntakaumudī, Paninian Commentarial Tradition.*

सर्वेषां शास्त्राणां व्याकरणमूलत्वात् आद्यं हि तत्स्थानम्। तत्र कारणं हि शास्त्रेणानेन भाषायाः शुद्धता सम्पाद्यते। इदं च शास्त्रं पदनिष्पत्तिविज्ञानमित्यपि कथ्यते। सत्स्वपि बहुषु व्याकरणग्रन्थेषु पाणिनीयव्याकरणं सर्वाधिकं प्रसिद्धिं भजते। कुतः इति चेत्, लौकिकवैदिकोभयशब्दनिष्पादकत्वात्। पाणिनीयव्याकरणस्य आधारस्तावत् अष्टाध्यायी। अष्टाध्याय्याश्च गूढतत्त्वावगमनार्थं केचन वृत्तिग्रन्थाः केचन च प्रक्रियाग्रन्थाः अत्यधिकं प्रसिद्धाः। तेषु प्रसिद्धेषु प्रक्रियाग्रन्थेषु अन्यतमो भवति भट्टोजिदीक्षितप्रणीतः वैयाकरणसिद्धान्तकौमुदीग्रन्थः। ग्रन्थेऽस्मिन् अष्टाध्याय्याः क्रममुल्लङ्घ्य प्रक्रियोपयोगी विचारः प्रतिपादितः। अत्र च ये ये सिद्धान्ताः प्रदत्ताः, ते च सर्वेऽपि सिद्धान्ताः मुनित्रयमनुसृत्यैव चर्चिताः। अस्य च ग्रन्थरत्नस्य बह्व्यः टीकाः विलसन्ति। तासु च टीकासु सुप्रसिद्धा वासुदेवदीक्षितप्रणीता बालमनोरमा। यद्यपीयं टीका बालानां कृते इति आपाततः प्रतीयते तथापि अस्यां टीकायां बहुत्र प्रौढविषयाः अपि चर्चिताः सन्ति। बहुत्र बालमनोरमाकारेण भाष्ये स्पष्टं, भाष्ये स्थितं, शेखरे स्पष्टं, कैयटे स्थितमित्येवंरूपेण व्याख्यातम्। कुत्रचित् भाष्यादिनानाग्रन्थसम्मताः सैद्धान्तिकाः विषयाः उपवर्णिताः। तेषु तेषु ग्रन्थेषु चर्चिताः विषयाः बालमनोरमाकारेण स्वरीत्या स्वशैल्या स्ववचोभिश्च स्वग्रन्थे प्रतिपादिताः इति तत्तद्ग्रन्थप्रभावः बालमनोरमायां परिलक्ष्यते। अत्र च सिद्धान्तकौमुद्याः तिङन्तप्रकरणे भू-धातोः लट्-लकारविषयकसूत्रेषु बालमनोरमायां कथं भाष्यादिग्रन्थान्तरप्रभावः परिलक्ष्यते, तद्विषये क्रमशः कौमुदीक्रममेवानुसृत्य आलोच्यते।

**वर्तमाने लट् (3.2.123)**

प्रतिपादितलकारान् स्पष्टीकुर्वन् तत्र क्रमप्राप्ते लट्-लकारविषये "वर्तमाने लट्" इति सूत्रव्याख्यानस्योपरि टीकयति बालमनोरमाकारः — "धात्वर्थक्रियाया वर्तमानत्वं तु वर्तमानकालवृत्तित्वम्। कालस्य तु वर्तमानत्वम् अतीतानागतभिन्न-

MEDHĀMANTHAN 2026
# MEDHĀMANTHAN
ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

कालत्वम्। भूतभविष्यतोः प्रतिद्वन्वी वर्तमानः कालः इति भाष्यम्"[1] इति। 'फलव्यापारयोर्धातुः' इति वचनाद् धातोः अर्थद्वयं भवति फलं व्यापारश्च। व्यापारो नाम क्रिया। तादृशधात्वर्थक्रियायाः वर्तमानत्वं नाम वर्तमानकाले विद्यमानत्वम्। नाम या क्रिया प्रारब्धा जाता परन्तु एतावत्पर्यन्तं न परिसमाप्ता, तादृशी क्रिया वर्तमानकाले विद्यते इति वक्तुं शक्यते। एवञ्च प्रारब्धत्वे सति अपरिसमाप्तत्वमेव वर्तमानकालत्वमिति तल्लक्षणम्। शाब्दिकनये कालः एकः अखण्डः नित्यश्च। वस्तुगत्या च तद्भेदः असम्भवः। परन्तु उपाधिभेदात् तद्भेदं प्रकल्प्य भूतभविष्यत्कालभिन्नकालत्वं वर्तमानकालत्वमिति वक्तुं शक्यते। अत्र च व्याख्याने महाभाष्यस्य प्रभावः दरीदृश्यते। तत् कथमिति चेत् अधः वर्ण्यते —

तथाहि भाष्यकृता काचित् शङ्का कृता यत् – प्रवृत्तस्य अविरामेऽपि लट् न प्राप्नोति, अतः स पृथक्तया शासितव्यः, कुतः इति चेत्, अवर्तमानत्वात्। इह अधीमहे इत्याद्युदाहरणेषु अध्ययनं प्रारब्धम्, न च तत् समाप्तम्। परन्तु यदा भोजनादिक्रियां कुर्वन्तः नाधीयते तदा इह अधीमहे इति प्रयोगः न स्यात्। यतोहि तत्र प्रारब्धमप्यध्ययनं भोजनादिक्रियया विरामं लभते। तर्हि तत्र प्रारब्धत्वे सति अपरिसमाप्तत्वं कथं संगच्छते? नाम तत्र भोजनकाले अध्ययनाभावे अध्ययनस्य परिसमाप्तत्वं समागतं खलु। एवञ्च इह अधीमहे इत्यत्र प्रारब्धत्वे सति परिसमाप्तत्वात् वर्तमानलक्षणं न संघटते इति शङ्का जायते। परन्तु एतादृशस्थले वस्तुगत्या अध्ययनं न परिसमाप्तम्, तत्र मध्ये केवलं भोजनादिक्रियया विरामः परिलक्ष्यते। सति चाध्ययनस्य विरामे तत्र लङ् स्यात्। अतः अस्यां स्थितौ प्रारब्धस्य अध्ययनस्य अविरामे पृथक्तया लट् शासितव्यः इति भाष्यकारस्य आशयः। तदुक्तं भाष्यकारेण – "प्रवृत्तस्याऽविरामे शासितव्या – भवन्ती। इहाधीमहे। इह वसामः। इह पुष्यमित्रं याजयाम इति। किं पुनः कारणं न सिध्यति? अवर्तमानत्वात्"[2] इति। अस्याः शङ्कायाः समाधानत्वेन "न्याय्या त्वारम्भानपवर्गात्"[3] इति वार्तिकव्याख्यानवेलायां भाष्यकृता उच्यते— "न्याय्या त्वेषा वर्तमानकालता। कुतः, आरम्भानपवर्गात्। आरम्भोत्रानपवृक्तः। एष एव च नाम न्याय्यो वर्तमानकालो यत्रारम्भोनपवृक्तः"[4] इति। आरम्भः नाम प्रारब्धः, अनपवृक्तश्च अपरिसमाप्तः। अर्थात् प्रारब्धक्रियायाः असमाप्तिं यावत् यावान् कालः तावत्कालावच्छिन्नकालः वर्तमानकालः। अत एव इह अधीमहे इत्याद्युदाहरणेषु प्रारब्धत्वे सति अपरिसमाप्तत्वात् वर्तमानत्वं युज्यते। यतोहि आफलनिष्पत्तेः अध्ययनम् अपरिसमाप्तम्, तत्र अन्तरालवर्ति भोजनादिकं तु नान्तरीयकम्, अपितु तस्यैव अध्ययनस्य अवयवक्रिया। तत्र भाष्यकारोऽपि कथयति "अस्ति च मुक्तसंशये विरामः" इति वार्तिकव्याख्यानकाले— "यं खल्वपि भवान्मुक्तसंशयं वर्तमानकालं न्याय्यं मन्यते भुङ्क्ते देवदत्त इति। तेनैतत्तुल्यम्। सोपि ह्यवश्यं भुञ्जानो हसति वा जल्पति वा पानीयं वा पिबति। यद्यत्र युक्ता वर्तमानकालता दृश्यते। इहापि युक्ता दृश्यताम्"[5] इति। अर्थात् मुक्तसंशयक्रियाऽपि अवान्तरव्यापारैः विरामं लभते। यथा भुङ्क्ते देवदत्तः इत्यत्र भुञ्जानोऽपि सः हसति जल्पति पानीयं वा पिबति। यदि तत्र वर्तमानकालः भवितुमर्हति तर्हि अत्रापि इह अधीमहे इत्यत्र वर्तमानकालता युक्ता एव। तत्र अध्ययनकाले भोजनादिक्रिया तु तस्यैव अवयवभूता, भोजनादिकं विना तदनिर्वाहात् इति भावः।

पुनः "नित्यप्रवृत्ते च कालाविभागात्" इति आक्षेपवार्तिकव्याख्यानकाले भाष्यकृता उच्यते यत्— "नित्यप्रवृत्ते च शासितव्या भवन्ती। तिष्ठन्ति पर्वताः, स्रवन्ति नद्य इति। किं पुनः कारणं न सिध्यति? कालाविभागात्। इह भूतभविष्यत्प्रतिद्वन्द्वो वर्तमानः कालः। न चात्र भूतभविष्यन्तौ कालौ स्तः"[6] इति। नाम पर्वताः तिष्ठन्ति, नद्यः स्रवन्ति इत्याद्युदाहरणेषु स्थित्यादिक्रियायाः सर्वदा सद्भावात्, तत्र वर्तमानकालस्य प्रतिद्वन्द्वित्वेन भूतभविष्यत्कालयोः असम्भवात् पर्वताः तिष्ठन्तीत्यादौ वर्तमानकालत्वं न सम्भवति इति आक्षेपः। तत्र समाधानत्वेन नित्यप्रवृत्तावपि कालविभागं समर्थयितुं भाष्यकारः "सन्ति च कालविभागाः" इति वार्तिकव्याख्यानकाले कथयति— "सन्ति च खल्वपि कालविभागाः तिष्ठन्ति पर्वताः, स्थास्यन्ति पर्वताः, तस्थुः पर्वता इति। किं शक्यन्त एते शब्दाः प्रयोक्तुमित्यतः सन्ति कालविभागाः? नावश्यं प्रयोगादेव इह हि भूतभविष्यत्वर्तमानानां राज्ञां याः क्रियास्ताः तिष्ठतेरधिकरणम्। इह तावत् तिष्ठन्ति पर्वताः इति, सम्प्रति ये राजानस्तेषां याः क्रियास्तासु वर्तमानासु। स्थास्यन्ति पर्वताः इति। इत उत्तरं ये राजानो भविष्यन्ति तेषां याः क्रियास्तासु भविष्यन्तीषु। तस्थुः पर्वताः इति, इह हि ये राजानो बभूवुस्तेषां याः क्रियास्तास्वतिक्रान्तासु"[7] इति। नित्यक्रियास्वपि कालविभागः सम्भवति। वयं न केवलं तिष्ठन्ति पर्वताः इति कथयामः, परन्तु लोकव्यवहारेऽपि तस्थुः पर्वताः, स्थास्यन्ति पर्वताः इति प्रयुञ्महे। न केवलं

शब्दप्रयोगात् भ्रमवशाद्वाऽयं विभागः प्रकल्पितः अपित्वत्रास्ति काचित् तार्किकी युक्तिः। तथाहि कालस्य एकत्वात् अखण्डत्वाच्च पर्वतानां स्थितौ साक्षान्नास्ति कोऽपि विभागः। परन्तु उपाधिभेदवशात् अखण्डोऽपि कालः खण्ड्यते। तथाहि पर्वताः तिष्ठन्ति इत्युक्ते सम्प्रति शासनं कुर्वतां राज्ञां याः वर्तमानाः क्रियाः, ताभिः सह पर्वतानां स्थितेः साहचर्यमस्ति। एवं स्थास्यन्ति पर्वताः इत्युक्ते ये राजानः उत्पत्स्यन्ते, तेषु च याः भाविक्रियाः भवितारः, ताभिः भाविक्रियाभिः सह पर्वतानां स्थितेः यदा तुलना क्रियते तदा सः पर्वतानां भविष्यत्कालः इत्युच्यते। एवञ्च ये राजानः बभूवुः, तैः याः क्रियाः आचरिताः, ताभिः अतीताभिः क्रियाभिः उपलक्षितः कालः एव पर्वतानां भूतकालः इति कथ्यते। एवञ्च भूतादिभेदेन राज्ञां स्थितिः भिन्ना अस्ति। सा च स्थितिरूपा क्रिया पर्वतादिस्थित्यादेः भेदिका। तासामेव क्रियाणां कालरूपत्वात्, कालस्य च क्रियाधिकरणत्वात् नित्यप्रवृत्तौ अपि कालविभागः सम्भवतीति भावः। इत्थं भाष्यस्य प्रभावः बालमनोरमायां प्रतिफलितः।

**लः कर्मणि च भावे चाऽकर्मकेभ्यः** (3.4.69)

बालमनोरमाकारः "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रस्य व्याख्यानावसरे कथयति यत्— "अत्राकर्मकग्रहणेन अविवक्षितकर्मका अपि गृह्यन्ते। तेन देवदत्तेन भुज्यत इत्यत्र सतोऽप्योदनरूपकर्मणः अविवक्षायां भावे लकारोऽस्त्येवेत्यन्यत्र विस्तरः"[8] इति। फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। फलसमानाधिकरणव्यापारवाचकत्वं चाकर्मकत्वम्। ये धातवः वस्तुतः सकर्मकाः सन्ति, ते अविवक्षातः अकर्मकाः अपि भवन्ति। अत्र वाक्यपदीयस्य प्रभावः परिलक्ष्यते, तद्यथा —

"धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।।"[9] इति।।

अत एव देवदत्तेन भुज्यते इत्याद्युदाहरणेषु भुज्-धातुः यद्यपि सकर्मकः, तथापि तस्य ओदनरूपकर्मणः अविवक्षावशात् अत्र भावे लकारः विधीयते।

**लस्य (3.4.77)**

"लस्य" इति सूत्रस्य व्याख्यानावसरे बालमनोरमाकारेण काशिकायामिव धात्वधिकारः अङ्गीकृतः। अपि च अकारो न विवक्षितः इति व्याख्यानमपि "अकार उच्चारणार्थः"[10] इति काशिकाकारवचनेन प्रभावितः दरीदृश्यते। यदि अत्र अकारस्यापि ग्रहणं स्यात् तर्हि 'चूडालः' इत्यादौ 'ल' इति यद् वर्तते, तस्य स्थानेऽपि तिबाद्यादेशाः स्युः। वस्तुतः धात्वधिकारप्रयोजनेन यथा काशिकाकारः चूडालादिषु अतिव्याप्तिं वारयति तदेव बालमनोरमाकारेणाऽपि अनुसृतः इति स्पष्टम्। तद्यथा– "धातोः" इत्यधिकारात् 'धातोः' विहितस्यैव लस्य इह ग्रहणम्, न तु ततः बहिः। लजादयस्तु ततः बहिः किल वर्तन्ते। अतः तत्रातिप्रसङ्गो न शङ्क्यः इति भावः।

**तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (3.4.78)**

सूत्रस्यास्य वैयाकरणसिद्धान्तकौमुद्याः अनुवृत्तिप्रदर्शनपूर्वकं सरलतया व्याख्यां चकार बालमनोरमाकारः। तत्र तस्+झि इत्यवस्थायां सकारस्य रुत्वे "हशि च" इति उत्वे, "आद्गुणः" इति गुणे ओकारे "तिप्तोझि-" इति प्राप्तमासीत्। तद्वारणाय बालमनोरमाकारः स्वमतं कथयति यत्— "तसादौ रुत्वाभाव आर्षः"[11] इति। तदन्यत्र व्याख्यानेषु न प्रकाशितम्। पुनः तत्र तिबादेः पित्करणस्य फलं तु द्विष्+तिप् इत्यादौ तिपि, शपि, शपः श्लौ, "पुगन्तलघूपधस्य च" इति गुणे द्वेष्+ति इति जाते, "ष्टुना ष्टुः" इति ष्टुत्वे द्वेष्टि इति रूपस्य सिद्धिः। यदि तिबादेः पित्करणं न कृतं स्यात्, तर्हि तस्य अपित्त्वात् "सार्वधातुकमपित्" इति सूत्रेण ङिद्वद्भावे तत्र "क्क्ङिति च" इति सूत्रेण गुणनिषेधः प्रसज्येत। तेन च अनिष्टं रूपं स्यात्। अतः तत्र इष्टरूपसिद्ध्यर्थं पित्करणं विहितमिति स्वरीत्या बालमनोरमाकारेण सुष्ठु वर्णितम्।[12] तत्र काशिकायां "पकारः स्वरार्थः"[13] इति स्पष्टीकृतमस्ति।

**लः परस्मैपदम् (1.4.99)**

सरलत्वात् स्पष्टत्वाच्च अत्र बालमनोरमाकारेण विशेषतया सूत्रव्याख्यानं न विहितम्। तत्र लः इति स्थानषष्ठीत्वेन

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

निर्दिष्टम्।

**तङानावात्मनेपदम्** (1.4.100)

अस्य सूत्रस्य व्याख्यानावसरे बालमनोरमाकारः निर्दिशति यत् अस्मिन् सूत्रे "लः परस्मैपदम्" इति पूर्वसूत्रात् ल इत्यनुवर्तते। अत्र आनग्रहणेन शानच्कानचोः एव ग्रहणं भवति। न तु "ताच्छील्यवयोवचनशक्तिषु चानश्" इत्यनेन विहितस्य चानशः(आन इत्यस्य), कुतः इति चेत् तस्य लादेशत्वाभावात्। तत्फलं तु परस्मैपदिभ्योऽपि चानश् सिद्ध्यति। तदुदाहरणं दर्शयति निघ्नाना इत्यादौ। अत्र बालमनोरमाकारेण विहिते व्याख्याने प्रौढमनोरमायाः प्रभावः दरीदृश्यते। तथाहि प्रौढमनोरमाकारेण उच्यते - "ल इति षष्ठ्यन्तानुवृत्तेर्लादेश एवानो गृह्यत इत्याह– शानच्कानचौ चेति। तेन ताच्छील्यादिषु चानश् परस्मैपदिभ्योऽपि भवति। कतीह निघ्नानाः"[14] इति।

**अनुदात्तङित आत्मनेपदम्** (1.3.12)

अत्र सूत्रव्याख्यानावसरे बालमनोरमाकारः प्रौढमनोरमामनुसरति यत्– "द्वन्द्वान्ते श्रूयमाणमिच्छब्दः प्रत्येकमभिसम्बध्यते"[15] इति। अत्र "उपदेशेऽजनुनासिक इत्" इत्यस्मात् सूत्रात् मण्डूकप्लुत्या यत् उपदेशे इत्यनुवृत्तं तत् ङितः इत्यनेन सम्बध्यते इति प्रौढमनोरमायाः अनुवादः[16] शब्दान्तरैः विहितः दरीदृश्यते। उपदेशाद् भिन्नस्थले अनुदात्तशब्दः यदि वर्तते, तर्हि इत्संज्ञायाः प्रवृत्तिरेव न भवति, यतोहि "उपदेशेऽजनुनासिक इत्" इति सूत्रे उपदेशे इति निर्दिष्टमस्ति। अतः यः कोऽपि व्यभिचारः तत्र नास्ति। एतादृशस्थलेऽपि बालमनोरमाव्याख्याने प्रौढमनोरमायाः प्रभावः परिलक्ष्यते। बालमनोरमाकारेण "भूवादयो धातवः" इति सूत्रात् धातुशब्दस्य मण्डूकप्लुत्या अत्र सूत्रे अनुवर्तनं यथा प्रौढमनोरमाकारेण ख्यापितं[17] तदेव अनुस्रियते।

उपदेशे इति किम् इत्यादिना[18] प्रौढमनोरमायां सूत्रस्य यत् पदकृत्यप्रदर्शनं विहितं, तदेव बालमनोरमायामपि यथावत् स्थापितमस्ति। तथाहि बालमनोरमायाम्— "उपदेशे किम्। चुकुटुषति। अत्र गाङ्कुटादिभ्यः इति सन आतिदेशिकमेव ङित्त्वम्, न त्वौपदेशिकम्" इति। नाम सूत्रे यदि उपदेशे इति नानुवर्तेत, तर्हि "उपदेशे यो ङित् तदन्तात् धातोः" इत्यर्थः न लभ्येत। तथा सति चुकुटिषति इति इष्टं रूपं न सिद्ध्येत्, तत्र आत्मनेपदत्वात् त-प्रत्यये चुकुटिषते इति अनिष्टं रूपं स्यात्। "कुट कौटिल्ये" इति धातुः उपदेशावस्थायां ङित् नास्ति। तत्र "गाङ्कुटादिभ्योऽञ्णिन्ङित्" इति सूत्रेण आतिदेशिकमेव ङित्त्वं विधीयते। तथाहि कुट्-धातोः औपदेशिकङित्त्वाभावात् नात्मनेपदमिति भावः।

"धातोः किम्। चङङ्भ्यां मा भूत्। अदुद्रुवत्। अवोचत्" इति प्रौढमनोरमोक्तिरपि तत्र बालमनोरमायां यथावत् अनूदितमस्ति। तदुक्तं बालमनोरमायाम्– "धातोः किम्। अदुद्रुवत्। अत्र णिश्रीति चङन्तान्नात्मनेपदम्" इति। द्रु गतौ इति धातोः लुङि तिपि च्लौ "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङि "इतश्च" इति ति इत्यस्य इकारलोपे "चङि" इति धातोर्द्वित्वे अडागमे अ+द्रु+द्रु+अ+त् इति जाते, "हलादिः शेषः" इति अभ्यासगतस्य लोपे "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" इति उवङि अदुद्रुवत् इति रूपम्। अत्र "अदुद्रुव" इत्येतावद्भागः चङन्तः वर्तते। चङः ङित्त्वेऽपि धातुत्वाभावात् नात्मनेपदम्। अन्यथा अदुद्रुवत इति अनिष्टं रूपं सिद्ध्येत, तन्मा भूत् इत्येतदर्थमत्र धातुग्रहणमिति भावः।

अपि च तत्र सूत्रार्थे उपदेशे यो ङित् तदन्तात् आत्मनेपदम् इति उच्यते खलु। अतः बालमनोरमाकारः ङिदंशे तदन्तविधेः कारणम् कथयति— "ङिदंशे तदन्तविध्यभावे तु बोभूयत इत्यादौ 'सनाद्यन्ताः-' इति धातुसंज्ञकाद् यङन्तादात्मनेपदं न स्यात्। ङित इत्येवोक्तौ यङो ङित्त्वेऽपि तदन्तस्य धातोर्ङित्त्वाभावादात्मनेपदं न स्यात्" इति। अत्र बोभूयते इत्यत्र भू-धातुः स्वयं ङित् नास्ति, परन्तु ङिदन्तः वर्तते। यतोहि बोभूयते इत्यत्र यः यङ्-प्रत्ययः विहितः स ङित् अस्ति। तत्र यदि तदन्तविधिः नोच्येत तर्हि, यङन्तस्य बोभूय इत्यस्य "सनाद्यन्ताः धातवः" इत्यनेन धातुसंज्ञायां सत्यामपि ततः आत्मनेपदं न स्यात् इति भावः। एवम् अत्रापि बालमनोरमाव्याख्याने प्रौढमनोरमायाः च्छटा प्रतिफलति।[19]

**स्वरितञितः कर्त्रभिप्राये क्रियाफले** (1.3.72)

अस्य सूत्रस्य व्याख्यानावसरे बालमनोरमाकारः स्वरितञितः इत्यत्र विग्रहप्रदर्शनपूर्वकं समासप्रदर्शनं विहितम्। द्वन्द्वान्ते

श्रूयमाणस्य इत्-पदस्य प्रत्येकेन सह सम्बद्धत्वमपि ख्यापितम्, तादृशव्याख्यानं तत्त्वबोधिन्यादिष्वपि[20] बहुत्र स्थलेषु परिलक्ष्यते, अतः अत्र अनेकव्याख्यानानां प्रभावः दरीदृश्यते। "कर्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम्, कर्मण्यण्"[21] इत्यादिभागोऽपि यथावत् प्रौढमनोरमातः स्पष्टतया बालमनोरमायां स्थापितो वर्तते।

पुनः तत्र बालमनोरमायां कर्तृगामिनीति पदस्य व्याख्यानकाले टीकाकारः व्याख्यायते यत् "होता याज्यया यजति" इत्याद्युदाहरणेषु यागफलस्य स्वर्गस्य यजमानगामित्वेन होतृगामित्वाभावाद् नात्मनेपदम्। याज्या नाम यज्ञस्य ऋङ्मन्त्रविशेषः। तन्मन्त्रकृतयज्ञेन स्वर्गः लप्स्यते इति स्वर्गः भवति यज्ञफलम्। अत्र यद्यपि होता एव यज्ञं करोति, स्वर्गलाभस्तु यजमानस्य भवति। अतः स्वर्गरूपक्रियाफलस्य कर्तृगामित्वाभावादत्र नात्मनेपदमिति भावः। पुनः तत्रैव बालमनोरमायामुदाहरणान्तरेण स्पष्टयति यत् "वेतनेन यज्ञादत्तभृतो देवदत्तः पचति" इत्याद्युदाहरणेषु पाकफलस्य भोजनस्य पक्तृगामित्वाभावान्नात्मनेपदम् इति। यद्यपि उभयत्र होत्रे पाचकाय च दक्षिणादयः पारिश्रमिकरूपेण प्रदीयन्ते तथापि तत्फलं न मुख्यम्, तस्य अन्यथाऽपि सिद्धत्वात्। एवञ्च तत्फलस्य मुख्यत्वाभावात् तत्र नात्मनेपदम्। तदुक्तम् बालमनोरमायाम्— "दक्षिणादिलाभस्तु न फलम्, लोकतो वेदतो वा यदुद्देशेन क्रियाप्रवृत्तिः तस्यैवात्र क्रियाफलशब्देन विवक्षितत्वात्।"[22] इति। "स्वर्गकामो यजेत" इत्यादिश्रुत्या स्वर्गादिफलं यागमन्तरेण न सम्भवति, तदुद्देशेनैव यागप्रवर्तनात्। यद्यपि दानादिनापि स्वर्गः भवति, तथापि स्वर्गविशेषस्य क्रियाविशेषनियतत्वाद् अनन्यलभ्यं तत्फलम्। तत्र याजकाः प्रतिग्रहेण दक्षिणां लभन्ते। प्रधानं तु स्वर्गाद्येव, असाधारणत्वात्। एवञ्च एतादृशस्थलेषु बालमनोरमायां महाभाष्यस्य प्रभावः दृक्पथमायाति। तथाहि भाष्यकृता— "न चान्तरेण यजिं यजिफलं वपिं वा वपिफलं लभन्ते। याजकाः पुनरन्तरेणापि यजिं गा लभन्ते भृतकश्च पादिकमिति।"[23] इति। वस्तुतः अत्र भर्तृहरेः इयं वाक्यपदीयकारिकाऽपि अत्यन्तं प्रासङ्गिकी –

"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।
तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्।।"[24] इति।।

**शेषात्कर्तरि परस्मैपदम् (1.3.78)**

अस्मिन् सूत्रे बालमनोरमाकारः शेषशब्दस्य विषये सिद्धान्तकौमुद्यां यद् "आत्मनेपदनिमित्तहीनाद्" इति ख्यापितम्, तावन्मात्रस्य व्याख्यां चकार।[25] विषयस्य स्पष्टत्वात् तादृशः प्रभावः नात्र परिलक्ष्यते।

**तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः (1.4.101)**

अत्र सूत्रव्याख्याने बालमनोरमाकारः प्रौढमनोरमामनुसरति।[26] तथाहि सूत्रार्थे सिद्धान्तकौमुद्याम् उभयोरिति यदुक्तं तदेव प्रौढमनोरमानुसारि विस्तरशः बालमनोरमायां व्याख्यातवान्।

**तान्येकवचनद्विवचनबहुवचनान्येकशः (1.4.102)**

अस्य सूत्रस्य वैयाकरणसिद्धान्तकौमुद्याः व्याख्यानावसरे बालमनोरमाकारः प्रौढमनोरमायाः क्रममनुसरन् व्याख्यायाः विषयं स्पष्टयति— "तच्छब्देन पूर्वसूत्रोपात्तानि प्रथममध्यमोत्तमाख्यानि तिङस्त्रीणि त्रीणि परामृश्यन्ते"[27] इति। अत्र प्रौढमनोरमायाः प्रभावः परिलक्ष्यते। तथाहि सूत्रे तानि इत्यस्य व्याख्यानं लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि इत्युक्तम्। तत्र कारणं किमिति चेत्, उच्यते— "अन्यथा एकसंज्ञाधिकारात् प्रथमादिसंज्ञानाम् एकवचनादिसंज्ञानां च पर्यायः स्यादिति भावः"[28] इति। प्रौढमनोरमायाः अयमेव भावः सरलतया बालमनोरमाकारेण स्वग्रन्थे प्रतिपादितः।

**युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (1.4.105)**

अत्र व्याख्यानावसरे बालमनोरमाकारः स्थानिनि इति शब्दविषये प्रौढमनोरमाकारेण विहितक्रममेव स्पष्टयति। तथाहि प्रौढमनोरमाकारेण स्थानिनि इति पदार्थस्य विषये प्रौढमनोरमायाम् "अप्रयुज्यमाने" इति यद् अर्थापनं विहितम्[29], तदेव व्याख्यानपुरःसरं व्यक्तीकृतमस्ति बालमनोरमायाम्[30]।

तत्र व्याख्यानकाले बालमनोरमायामुच्यते— "अत्वं त्वं संपद्यत इत्यत्र तु न मध्यमपुरुषः, तत्र युष्मच्छब्दस्य गौणत्वात्"[31] इति। अस्मिन्स्थले महाभाष्यस्य प्रभावः परिलक्ष्यते। तथाहि भाष्यवचनम्— "अथेह कथं भवितव्यम् – अत्वं त्वं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

संपद्यते इति त्वद्भवति मद्भवतीति। आहोस्वित्त्वद्भवसि मद्भवामीति? त्वद्भवति मद्भवतीत्येवं भवितव्यम्। मध्यमोत्तमौ कस्मान्न भवतः? गौणमुख्ययोर्मुख्ये संप्रत्ययो भवति"[32] इति। अत्र अभूततद्भावस्य प्राधान्यं वर्तते। तद्धर्मसमाचारादत्र युष्मदर्थरूपत्वमारोपितमिति युष्मच्छब्दस्य गौणत्वम्। महाभाष्यस्य अयमेव भावः बालमनोरमाकारेण स्वग्रन्थे स्वभाषया प्रकटितः।

पुनः तत्र व्याख्यानकाले बालमनोरमाकारः आह – "भवानागच्छतीत्यादौ भवच्छब्दयोगे तु न मध्यमपुरुषः, युष्मच्छब्दस्य संबोध्यैकविषयत्वात्, भवच्छब्दस्य तु स्वभावेन संबोध्यासंबोध्यसाधारणत्वादित्यलम्" इति। अत्र बालमनोरमाव्याख्याने वाक्यपदीयस्य प्रभावः दरीदृश्यते। तथाहि भर्तृहरिणा वाक्यपदीये उच्यते —

"अभिमुखीभावमात्रेण संबोध्योऽभिधीयते।
युष्मदर्थस्तु संबोध्यः क्रियासु विनियुज्यते।।
भवच्छब्दस्तु संबोध्ये पूजायां केवलं स्मृतः।
सम्बोधनक्रियायाश्च न द्वितीयादिभाग्भवेत्।।"[33] इति।।

अर्थात् युष्मच्छब्दः संबोध्यः भवति। सम्मुखे स्थितं कञ्चन जनं संबोधयन् एव युष्मच्छब्दस्य प्रयोगः कर्तुं शक्यते। परन्तु भवच्छब्दस्य यथा सम्मुखे स्थितं जनं सम्बोधयन् प्रयोगः भवितुमर्हति तथैव तत्रभवान् इति अप्रत्यक्षेऽपि तस्य प्रयोगः भवति इति भवच्छब्दः संबोध्यासंबोध्यसाधारणः। अतः तद्योगे न मध्यमपुरुषः। वाक्यपदीयस्य अयमेव भावः बालमनोरमाकारेण स्वभाषया सरलीकृतः।

**प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च** (1.4.106)

अस्य सूत्रस्य व्याख्यानं सिद्धान्तकौमुद्याः अनुसारेण स्पष्टतरेण विहितमस्ति बालमनोरमायाम्।

**अस्मद्युत्तमः** (1.4.107)

अस्य सूत्रस्य व्याख्यानावसरे वैयाकरणसिद्धान्तकौमुद्यां सूत्रार्थे तथाभूते इति यत् पदमस्ति, तद् स्पष्टयति बालमनोरमाकारः। एतत् तत्त्वबोधिन्यामपि[34] दरीदृश्यते। तस्मात् कारणात् अत्र बालमनोरमायां तत्त्वबोधिन्याः प्रभावः इति स्पष्टम्।

**शेषे प्रथमः (1.4.108)**

अस्य सूत्रस्य व्याख्यानं सिद्धान्तकौमुद्याः अनुसारेण स्पष्टतया विहितमस्ति। तत्र प्रसङ्गक्रमेण बालमनोरमाकारेण उच्यते यत् – "त्वम् अहं च पचाव इत्यत्र तु परत्वादुत्तमपुरुष एव। न तु मध्यमः। देवदत्तस्त्वं च पचथ इत्यत्रापि न प्रथमपुरुषः। युष्मदस्मदस्सत्त्वेन शेषत्वाभावादित्यलम्" इति। बालमनोरमायामस्मिन् स्थले वाक्यपदीयस्य प्रभावः दृष्टिपथमायाति। तदुक्तं वाक्यपदीये –

"अस्मदा सम्प्रयुज्येत युष्मद्येकविभक्तिके।
तत्रास्मदर्थप्राधान्यात् परत्वादुत्तमो भवेत्।।
युष्मदा तु सम्प्रयुक्ते शेषे नित्यं प्रसज्यते।
युष्मदर्थस्य प्राधान्यान्मध्यमस्तत्र जायते।।"[35] इति।।

**भू सत्तायाम्**

वैयाकरणसिद्धान्तकौमुद्यां "भू सत्तायाम्" इति यत् धातोः समुपस्थापनं विहितम्, तत्र सत्तायाः यद् व्याख्यानम् "आत्मधारणं सत्ता" इति तद् धातुवृत्तावपि विचारितमस्ति, तस्मात्कारणादिह माधवीयधातुवृत्तेः[36] प्रभावः परिलक्ष्यते। अत्रैव सिद्धान्तकौमुद्यां स्थितस्य कर्तृविवक्षायाम् इति पदस्य व्याख्यानेन बालमनोरमाकारः सरलयति।

**तिङ्शित्सार्वधातुकम्** (3.4.113)

अत्र सूत्रव्याख्यानावसरे बालमनोरमाकारः सूत्रे धात्वधिकारस्य महत्त्वं प्रौढमनोरमायां प्रतिपादितक्रमानुसारेण

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

सरलयति, तेन धात्वधिकारोक्ता एव तिङः शितश्च प्रत्ययाः सार्वधातुकसंज्ञकाः भवन्तीति सिद्धान्तितम्। तदुक्तं बालमनोरमायाम् – "धातोः इत्यधिकृतम्, तदाह धात्वधिकारोक्ता इति। तेन हरीनित्यत्र शसः सार्वधातुकत्वं न। अन्यथा तिङ्शित्सार्वधातुकम् इति शसः सार्वधातुकत्वात् सार्वधातुकमपिदिति ङित्त्वे घेर्ङिति इति गुणः स्यात्" इति। अर्थात् यदि सूत्रे धातोः इति नाधिक्रियेत तर्हि हरि+शस् इत्यत्र शसः तिङ्गात् सार्वधातुकसंज्ञायां, पुनः तस्य अपित्त्वात् सार्वधातुकमपित् इति ङिद्वद्भावे तस्मिन् परे घेर्ङिति इति सूत्रेण इकारस्य गुणे एकारे अयादेशे हरय्+अस् इति जाते, तस्माच्छसो नः पुंसि इति सूत्रेण सकारस्य नकारे हरयन् इति अनिष्टं रूपं स्यादिति भावः। अत्र प्रौढमनोरमायाः प्रभावः परिलक्ष्यते। तथाहि प्रौढमनोरमायाम् – "धात्वधिकारेति किम्। हरीन्। शसः सार्वधातुकमपित् इति ङित्त्वे घेर्ङिति इति गुणः स्यात्"[37] इति।

**कर्तरि शप् (3.1.68)**

अस्य सूत्रस्य व्याख्यानावसरे बालमनोरमाकारः "सार्वधातुके यक्" इत्यतः सार्वधातुकपदं, "धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ्" इत्यतः धातोः इति पदस्य च अनुवृत्तिविषये तत्त्वबोधिन्यनुसारिण्येव[38] व्याख्यां चकार।

**सार्वधातुकार्धधातुकयोः (7.3.84)**

अस्य सूत्रस्य व्याख्यानावसरे बालमनोरमाकारेण "मिदर्गुणः" इत्यस्मात् सूत्रात् गुणः इति अनुवर्त्य "इको गुणवृद्धी" इति परिभाषया इकः इति षष्ठ्यन्तस्य पदस्य उपस्थितिः प्रदर्श्यते। ततश्च "अङ्गस्य" इत्यधिकृत्य तस्य च इकः इति षष्ठ्यन्तस्य पदस्य विशेष्यत्वात् तदन्तविधिना सूत्रार्थः सरलीकृतः। विषयस्य स्पष्टत्वात् अत्र न तथा व्याख्यानान्तरप्रभावः परिलक्ष्यते।

**झोऽन्तः (7.1.3)**

अत्र सूत्रव्याख्याने बालमनोरमाकारः प्रौढमनोरमामनुसरन् कथयति— "आयनेयी- इति सूत्रात् प्रत्ययग्रहणमनुवर्तते, न त्वादिग्रहणमपि, अस्वरितत्वात्"[39] इति। अर्थात्, "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रे प्रत्ययादीनाम् इति यः शब्दः वर्तते, तत्र विद्यमानस्य आदिशब्दस्य अनुवर्तनं न कर्तव्यम्। कुतः इति चेत् तत्र स्वरितत्वाभावात्। यतोहि "स्वरितेनाधिकारः" इति सूत्रेण स्वरितत्वयुक्तस्यैव शब्दस्वरूपस्य अधिकारः भवति। अत्र प्रौढमनोरमाकारेणाऽपि समानमेव कथितम्— "आयनेयीनीयिय- इति सूत्रात्प्रत्ययग्रहणमनुवर्तते। आदिग्रहणं निवृत्तम्। अन्यथा शयान्ते इति न सिध्येत्"[40] इति। एवञ्चात्र बालमनोरमायां प्रौढमनोरमायाः प्रभावः परिलक्षितः।

पुनः तत्र व्याख्यानकाले बालमनोरमाकारः टीकयति - "प्रत्ययावयवस्य इति किम्। उज्झिता। अत्र धात्ववयवस्य झकारस्य न भवति"[41] इति। अस्मिन् स्थले काशिकायाः प्रभावः दरीदृश्यते। व्याख्यातं च काशिकाकारेण— "प्रत्ययस्येत्येव उज्झिता। उज्झितुम्। उज्झितव्यम्"[42] इति। तथाहि उज्झ उत्सर्गे इति धातोः लुटि तिपि तासि तिपः डा-प्रत्यये डित्त्वसामर्थ्यात् अभस्यापि टेर्लोपे इडागमे उज्झ्+इ+त्+आ इति जाते, यदि सूत्रे प्रत्ययावयवस्य झस्य नोच्येत तर्हि तत्र धात्ववयवभूतः यः झकारः, तस्यापि अन्तादेशः स्यात्। ततश्च उज्+अन्त्+इ+त्+आ इति स्थिते, वर्णसम्मेलने च उजन्तिता इति अनिष्टं रूपं स्यादिति भावः। अयं भावः यथा काशिकायां प्रकटितः तथैव महाभाष्येऽपि भाष्यकृता उद्घोषितः। तथाहि भाष्यम् – "झादेशे धात्वन्तस्य प्रतिषेधो वक्तव्यः। उज्झिता। उज्झितुमिति"[43] इति। एवञ्चात्र बालमनोरमायां महाभाष्यस्य प्रभावोऽपि परिलक्ष्यते।

तत्र पुनः व्याख्यानकाले बालमनोरमाकृता उच्यते यत् – "आदिग्रहणानुवृत्तौ तु शयान्तै इति न सिद्ध्यति। अन्तादेशात्प्रागेवान्तरङ्गत्वाल्लेटोऽडाटावित्याटि कृते झकारस्य प्रत्ययादित्वाभावाद् इति भाष्ये स्पष्टम्" इति। तथाहि पूर्वमेव व्याख्यातं यत् आदिग्रहणं नानुवृत्तम् अस्वरितत्वात्। आदिग्रहणं यदि अनुवर्तेत तर्हि शयान्तै इति रूपं न सिद्ध्येत। तथाहि शीङ् शयने इति धातोः लेटि झ-प्रत्यये "लेटोऽडाटौ" इति आडागमे "झोऽन्तः" इति अन्तादेशे शी+आ+अन्त्+अ इति जाते, सवर्णदीर्घे टेरेत्वे शयान्ते इति स्थिते, "वैतोऽन्यत्र" इत्यनेन लेट एकारस्य ऐकारे शयान्तै इति रूपं सिध्यति। सूत्रे यदि आदिग्रहणम् अनुवर्तेत तर्हि प्रत्ययस्य यः आदिः, तस्यैव झस्य अन्तादेशः स्यात्। शयान्तै इत्यत्र झकारः प्रत्ययादिः नास्ति, "लेटोऽडाटौ" इत्यनेन आडागमविधानात्, आडागमस्य च "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषया झस्य

अङ्गान्तर्भूतत्वेन प्रत्ययादित्वात्। तथा च आडागमस्य प्रत्ययादित्वात् झस्य च प्रत्ययादित्वाभावे शयान्तै इत्यत्र अन्तादेशः न स्यात्। तेन च अनिष्टं रूपं स्यात्। अतः तत्र प्रत्ययावयवस्य इत्येतावदेव वक्तव्यम्। ननु यदि आदावेव अन्तादेशं विधाय ततः आडागमः विधीयताम्, तदा तु झस्य प्रत्ययादित्वं लभ्यते खलु इति चेत् न, अन्तरङ्गत्वात् अन्तादेशात् पूर्वमेव "लेटोऽडाटौ" इत्यनेन आडागमस्य विधानात्, झकारस्य प्रत्ययादित्वाभावाद् आदिग्रहणं न कर्तव्यमिति भावः। अयञ्च भावः महाभाष्यतः बालमनोरमाकारेण सरलतया स्वभाषया प्रकटितः। तदुक्तं महाभाष्यकारेण— "तत्रैतस्मिन्प्रत्ययग्रहणेऽनुवर्तमाने आदिग्रहणे निवृत्ते शयान्तै इत्यनकारान्तत्वादङ्गस्याऽद्भावः प्राप्नोति तस्य प्रतिषेधो वक्तव्यः"[44] इति। तत्र कैयटोऽपि महाभाष्यकारस्य इदं वचनं सरलीकुर्वन्नाह— "अन्तरङ्गत्वादाटि कृतेऽन्तादेशापवादोऽदादेशः प्राप्नोति। अनकारान्तादङ्गात्प्रत्ययस्य परत्वात्"[45] इति।

**अतो दीर्घो यञि (7.3.101)**

बालमनोरमाकारः सिद्धान्तकौमुद्याः विहितक्रममेवानुसृत्य सूत्रमिदं व्याख्यातवान्। विषयस्य सरलत्वात् स्पष्टत्वाच्चात्र न कोऽपि प्रभावः दरीदृश्यते।

**उपसंहारः—**

टीक्यते गम्यते ज्ञायते ग्रन्थार्थः अनयेति टीका। टीका च मूलग्रन्थस्य गूढार्थं प्रकाशयति। तथाहि उच्यते –

"मूलग्रन्थस्य तात्पर्यं यया सम्यक् प्रकाश्यते।
संकटस्थानभेदेन सा टीका परिकीर्तिता।।"[46] इति।।

टीकनकाले एकस्यां टीकायां बहुग्रन्थप्रभावः परिलक्ष्यते। अत्र बालमनोरमायामपि सिद्धान्तानां प्रतिपादने ग्रन्थकृता भाष्यादिबहुग्रन्थाः अनुसृताः। एवञ्च सूत्रव्याख्यानेषु बहुत्र भाष्यादिबहुग्रन्थमतानि सरलीकृतानि दृश्यन्ते। यद्यपि तत्र ग्रन्थकारस्य स्वशैली ग्रन्थान्तराद्भिन्ना, स्वकीया च तथापि तत्तद्ग्रन्थाशयः बालमनोरमाकारेण आदृतः, स्वभाषया च प्रकटितः।

## Endnotes

1. वैयाकरणसिद्धान्तकौमुदी, तृतीयो भागः, बालमनोरमा। पृष्ठसंख्या - 4
2. महाभाष्यम्, तृतीयं खण्डम्, पृष्ठसंख्या -195
3. तत्रैव
4. तत्रैव
5. तत्रैव
6. महाभाष्यम्, तृतीयं खण्डम्, पृष्ठसंख्या -195
7. महाभाष्यम्, तृतीयं खण्डम्, पृष्ठसंख्या -196
8. सिद्धान्तकौमुदी, तृतीयो भागः, पृष्ठसंख्या - 5
9. वाक्यपदीयम् – 3.7.88
10. लस्येत्ययमधिकारः। अकार उच्चारणार्थः। लकारमात्रं स्थानित्वेनाधिक्रियते। - काशिका
11. सिद्धान्तकौमुदी, भ्वादिप्रकरणम्। बालमनोरमा। पृष्ठसंख्या - 10
12. तिबादौ पकारानुबन्धप्रयोजनं तु द्वेष्टीत्यादौ सार्वधातुकमपिदिति ङित्त्वनिवृत्त्यर्थम्। - सिद्धान्तकौमुदी, तृतीयो भागः, बालमनोरमा। पृष्ठसंख्या - 10
13. काशिका
14. प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 309
15. प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 309
16. उपदेशेदनुनासिक इति सूत्रात् उपदेशग्रहणमनुवृत्तं, तदपि ङिदंश एव सम्बध्यते, अव्यभिचारादिति भावः। - प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 309

17. एतच्च भूवादय इति सूत्रान्मण्डूकप्लुत्यानुवृत्तस्य धातव इत्यस्य विभक्तिविपरिणामाल्लभ्यत इति प्राञ्चः। - प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 309
18. उपदेश इति किम्। चुकुटिषति। गाङ्कुटादिभ्यः इति सन आतिदेशिकं ङित्त्वम्। - प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 309
19. किं च तदन्तविधिलाभार्थमपि धातुग्रहणम्। फलन्तु यङन्तादीयङन्ताच्चात्मनेपदसिद्धिः। बोभूयते। ऋतीयते। - प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 310
20. पूर्ववदित्च्छब्दः प्रत्येकं सम्बध्यते। - सिद्धान्तकौमुदी, तृतीयो भागः। तत्त्वबोधिनी। पृष्ठसंख्या - 12
21. प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 311
22. सिद्धान्तकौमुदी, भ्वादिप्रकरणम्। बालमनोरमा। पृष्ठसंख्या - 12
23. महाभाष्यम् भ्वादिप्रकरणम्। पृष्ठसंख्या - 183
24. वाक्यपदीयम् 3.12.18
25. 'अनुदात्तङित-' इति 'स्वरितञित-' इति चोक्ताद् आत्मनेपदविषयादन्यः शेषः। - सिद्धान्तकौमुदी, तृतीयो भागः। बालमनोरमा। पृष्ठसंख्या - 12
26. ननु तिङः षट् त्रिकाः संज्ञासु तिस्र इति यथासंख्यं न प्राप्नोत्यत आह – उभयोरिति। परस्मैपदमात्मनेपदमिति चानुवर्तते, तेन पदद्वये प्रत्येकं संज्ञा प्रवर्तते इति भावः। - प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 311
27. सिद्धान्तकौमुदी, तृतीयो भागः। बालमनोरमा। पृष्ठसंख्या - 13
28. प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 312
29. स्थानिनीत्यस्य व्याख्यानमप्रयुज्यमान इति। - प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 312
30. स्थानं प्रसङ्गः अस्यास्तीति स्थानी, तस्मिन् प्रसक्ते सतीत्यर्थः। प्रसङ्गश्च तदर्थावगतौ सत्यां वक्त्रा अप्रयोग एव भवति। तथा च स्थानिनीत्यनेन उपपदभूते युष्मदि प्रयोगं विना स्वार्थं बोधयति सतीत्यर्थः पर्यवस्यति, तदाह अप्रयुज्यमान इति। -सिद्धान्तकौमुदी, तृतीयो भागः। बालमनोरमा। पृष्ठसंख्या - 14
31. सिद्धान्तकौमुदी, तृतीयो भागः। बालमनोरमा। पृष्ठसंख्या - 14
32. महाभाष्यम्। पृष्ठसंख्या - 306
33. वाक्यपदीयम्। साधनसमुद्देशः - 3.7.163, 3.7.164
34. तथाभूत इति। तिङ्वाच्यकारकवाचिनि प्रयुज्यमानेऽप्रयुज्यमाने चेत्यर्थः। - सिद्धान्तकौमुदी, तृतीयो भागः। तत्त्वबोधिनी। पृष्ठसंख्या - 15
35. वाक्यपदीयम्। साधनसमुद्देशः - 3.7.161, 3.7.162
36. वर्तत इति शेषः। सत्तेहात्मभरणम्। यदाह हरिः – 'आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते'। - माधवीयधातुवृत्तिः। पृष्ठसंख्या - 2
37. प्रौढमनोरमा। भ्वादिप्रकरणम्। पृष्ठसंख्या - 313
38. "सार्वधातुके यक्" इत्यतः सार्वधातुक इत्यनुवर्तते, "धातोरेकाचः-" इति सूत्राद्धातोरिति च। - सिद्धान्तकौमुदी, तृतीयो भागः। तत्त्वबोधिनी। पृष्ठसंख्या - 15
39. सिद्धान्तकौमुदी, तृतीयो भागः। बालमनोरमा। पृष्ठसंख्या - 16
40. प्रौढमनोरमा, भ्वादिप्रकरणम्। पृष्ठसंख्या - 314
41. सिद्धान्तकौमुदी, तृतीयो भागः। बालमनोरमा। पृष्ठसंख्या - 17
42. काशिका। झोऽन्तः इति सूत्रव्याख्यानम्।
43. महाभाष्यम्। सप्तमो भागः। झादेशे धात्वन्तप्रतिषेधः इति वार्तिकभाष्यम्। पृष्ठसंख्या - 13
44. महाभाष्यम्। सप्तमो भागः। पृष्ठसंख्या - 14
45. महाभाष्यम्। सप्तमो भागः। पृष्ठसंख्या - 14
46. न्यायकोशः

## Bibliography


- वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता, तृतीयो भागः, सम्पादकः - गिरिधरशर्मा चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करश्च, मोतीलाल बनारसीदास, दिल्ली, 2014

- वैयाकरणसिद्धान्तकौमुदी, चतुर्थ भाग, श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता, व्याख्याकारः – श्रीगोविन्दाचार्यः, सम्पादिका – लक्ष्मी शर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2019
- व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, हिन्दीव्याख्याकारः सम्पादकश्च प्रो. जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2019
- व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, संशोधकः – श्री भार्गव शास्त्री जोशी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
- परिभाषेन्दुशेखरः सुबोधिनी-हिन्दीव्याख्योपेतः, हिन्दिव्याख्याकारः – आचार्य विश्वनाथ मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2022
- अष्टाध्यायी, सम्पादकः – श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2016
- काशिका, सम्पादकौ – ड. जयशङ्कर लाल त्रिपाठी, ड. सुधाकर मालवीयश्च, तारा प्रिन्टिंग वर्क्स, वाराणसी, 1986


———